सप्तमः पाठः

# एहि एहि वीर रे ....

BZL579



एहि एहि वीर रे, वीरतां विधेहि रे

भारतस्य रक्षणाय, जीवनं प्रदेहि रे।।

त्वं हि मार्गदर्शकः, त्वं हि देशरक्षकः

त्वं हि शत्रुनाशकः, देश-प्रेम-वर्धकः।।

साहसी सदा भवेः, वीरतां सदा भजेः

भारतीय-संस्कृतिं, मानसे सदा धरेः।।

पदं-पदं मिलच्चलेत्, सोत्साहं मनो भवेत्

भारतस्य गौरवाय, सर्वदा रणे जयेत्।।

एहि एहि वीर रे ...

- लक्ष्मीकान्त जाम्बोरकरः

*शिक्षण-सकेतः -*

*शिक्षकः सचलदूरभाषमाध्यमेन(मोबाइल) गीतं श्रावयेत्।*

शब्दार्थाः

**एहि**-आओ, **भारतस्य**-भारत की, **रक्षणाय**-रक्षा के लिए, **प्रदेहि**-दो, **भवेः**-बनें , **मानसे**-मन में, सदा **धरेः**-धारण करें ।